# उपसंहारः

# उपसंहारः

वेदाः अपौरुषेयाः। तद्गत वाक्यानि मनुष्याय सन्मार्ग प्रति नयन्ति। अतः निष्कारणम् एव वेदाध्ययनं कर्तव्यम् इति उक्तमस्ति। महाभाष्यकारः वदति 'षड›ोवदोऽध्येयो ज्ञेयश्चेति' अर्थात् अस्य अध्ययनं यदि निष्कारणं कृतं तर्हि महर्षि पतञ्जल्यानुसारं श्रेयः प्राप्नोति।

यजुर्वेदस्योपवेदः धनुर्वेदः अस्ति। यद्यपि धनुर्वेदोऽयं लुप्तप्रायोऽधुना तथापि ग्रन्थात्रेषु अस्योद्धरणैरस्यास्तित्वं ज्ञायते। सोऽयं धनुर्वेदः, वशिष्ठ–विश्वमित्र–जामदग्न्य–वैशाम्पायन–भरद्वाजप्रभृतिभिमुनिः प्रणीत इति प्रसिद्धिः। महाभारतादिग्रन्थेषु अस्य महत्वपूर्णवर्णनमुपलभ्यते। अस्मद्धन्यतया तादृशा गौरवशालिनो ग्रन्थाः सर्वङ्करस्य कालस्यादरोदर्यां विलीना इति सुभृशं विषीदति मनः। धनुर्वेदविषयका ग्रन्थाः अद्यत्वेपि समुपलभ्यन्त इत्प्युश्रूयते परं नाद्यावधि दृष्टिपथ›ताः। विदुषां प्रवरैरत्र भूयस्तरमन्वेषणं विधेयम्।

यजुर्वेदस्योपवेदो धनुर्वेदोऽयं पादचतुष्टयप्रणिबद्धः विश्वमित्रमहर्षिभिः संग्रथितः इति निर्दिष्टपूर्वकम्। तत्र दीक्षापादनाम्नि प्रथमे पादे धनुर्लक्षणम् निरूपितम्। अत्र धनुः शब्दः चतुर्विधायुधपरः। ते च आयुधाश्चचतुर्विधाः मुक्त–अमुक्तक–मुक्तकामुक्तक'यन्त्रमुक्तभेदात्। तत्राऽपि –

मुक्तकश्चतुर्विधाः। खडगादिः, मुक्तामुक्तकश्च शल्यादिः, यन्त्रमुक्तश्च शरादिः। पुनरपि त आयुधा बाह्वैष्णव–पाशुपत–प्रजापत्य–आग्नेय– भेदादनेकविधाः।

द्वितीये पादे च अस्त्रशस्त्रादिविज्ञानम्।

तृतीये च पुनः गुरुविशेषसाम्प्रदायिक–शस्त्रादिविवरणम् तेषामभ्यासः, सिद्धीकरणं सम्यक प्रतिपादितम्।

चतुर्थाध्याये तु देवार्चनाऽभ्याससिद्धिः, अस्त्रशस्त्रादिप्रयोगश्च प्रदर्शितः।

मया **महर्षिवशिष्ठकृत–'धनुर्वेदसंहितायाः' समीक्षात्मकमध्ययनम्** इति शोधविषयं स्वीकृत्य शोधकार्यं कृतमिति । शोधप्रबन्धस्यसारांशः अत्र लिख्यते। अयं विषयः चतुर्षु अध्यायेषु विभक्तोऽस्ति । तद्यथा –

प्रथमे हि मया विषयस्य प्रस्तावना लिखितः ततः परं –

**प्रथमेऽध्याये** महर्षिवशिष्ठस्य संस्कृतवांगमये महत्त्वं वैशिष्ट्य×च लिखितम्। अत्र ऋग्वेदादारभ्य वशिष्ठरामायणपर्यन्तं तन्निर्मितग्रन्थानां विस्तरेण विवेचनं कृतम्।

**द्वितीयेऽध्याये** उपवेदानां विवेचनमस्ति ।तत्रापि विशेषरूपेण धनुर्वेदस्य वैशिष्ट्यं, विषयविवेचनं, धनुर्वेदे के–के विषयाः ग्रन्थकारेण निर्दिष्टाः तेषां समेषां विवरणम् उपस्थापितम् ।

**तृतीयेऽध्याये** अहमत्र धनुर्वेदसंहितायाः साङ्गोपाङ्ग परिचयं अलिखम्। अत्रैव महर्षिवशिष्ठविरचितस्य ग्रन्थस्य सारांशरूपेण अत्र परिचयः उपस्थाप्यते, धनुर्वेदसंहितायां 265 श्लोकाः सन्ति ।अनेन सह गद्यखण्डानि च ग्रन्थकारेण लिखितानि। तन्मध्ये धनुर्वेदविषयस्य विशद् विवेचनमत्र अतीवरुचिकरशैल्यां लिखितम्। तत्रापि युद्धस्य समस्तविधामपि रहस्यमत्र उद्घाटितम् ।

अस्मिन्नेव अध्याये धनुर्वेदसंहितायां वर्णिताशस्त्राणां परिचयः उपयोगिता च विद्यते। तथा च शस्त्राणां लक्षणानि उदाहरणानि चिन्हानि च निर्दिष्टाानि।

सम्प्रति काले कानि–कानि शस्त्राणि–अस्त्राणि प्रसिद्धाानि सन्ति तेषाम् ममात्र उल्लेखः कृतः। धनुर्वेदसंहितायां प्रतिपादित अस्त्रशस्त्रलक्षणानां मया अत्र समीक्षा कृता।

**चतुर्थेऽध्याये** सारांशरूपेण धनुर्वेदसंहितायां ग्रन्थकारेण यदुक्तं तत्समीक्षणमत्र लिखितमस्ति ।

**पर्यन्ते च मयोपसंहारः** लिखितः । अत्र धनुर्वेदसंहितायाः समीक्षात्मकमध्ययनम् इत्यस्य उपयोगिता तद्रहस्यं सम्प्रति अस्य किं स्वरूपम् इत्यादिकं सर्वमत्र लिखितमस्ति।

**परिशिष्टे** धनुर्वेदसंहितायां प्रयुक्तपारिभाषिकशब्दानाम् अर्थः तत्प्रयोगाश्च संग्रथितः ।

**सन्दर्भग्रन्थरूपेण** मया अत्र वेदादरभ्य धनुर्वेदस्य सन्दर्भितग्रन्थानां संस्कृतसाहित्यस्य च आधारः, ग्रन्थानां च नामावली संश्लिष्टा । तथा शोधविषयस्य अनुक्रमणिकापि अत्र प्रस्तुताऽस्ति